श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ तृतीयः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ तृतीयः सर्गः ॥

## लङ्काया दुर्गद्वारसैन्यविभागसङ्क्रमप्रभृतीन् वर्णयित्वा तत्र वानरसेनाप्रस्थापनाय हनुमतः श्रीरामं प्रति प्रार्थना

सुग्रीवस्य वचः श्रुत्वा हेतुमत् परमार्थवत्।
प्रतिजग्राह काकुत्स्थो हनूमन्तमथाब्रवीत्॥ **6.3.1** ॥

तपसा सेतुबन्धेन सागरोच्छोषणेन च।
सर्वथापि समर्थोऽस्मि सागरस्यास्य लङ्घने॥ **6.3.2** ॥

कति दुर्गाणि दुर्गाया लङ्कायास्तद् ब्रवीष्व मे।
ज्ञातुमिच्छामि तत् सर्वं दर्शनादिव वानर॥ **6.3.3** ॥

बलस्य परिमाणं च द्वारदुर्गक्रियामपि।
गुप्तिकर्म च लङ्काया रक्षसां सदनानि च॥ **6.3.4** ॥

यथासुखं यथावच्च लङ्कायामसि दृष्टवान्।
सर्वमाचक्ष्व तत्त्वेन सर्वथा कुशलो ह्यसि॥ **6.3.5** ॥

श्रुत्वा रामस्य वचनं हनूमान् मारुतात्मजः।
वाक्यं वाक्यविदां श्रेष्ठो रामं पुनरथाब्रवीत्॥ **6.3.6** ॥

श्रूयतां सर्वमाख्यास्ये दुर्गकर्म विधानतः।
गुप्ता पुरी यथा लङ्का रक्षिता च यथा बलैः॥ **6.3.7** ॥

राक्षसाश्च यथा स्निग्धा रावणस्य च तेजसा।
परां समृद्धिं लङ्कायाः सागरस्य च भीमताम्॥ **6.3.8** ॥

विभागं च बलौघस्य निर्देशं वाहनस्य च।
एवमुक्त्वा कपिश्रेष्ठः कथयामास तत्त्वतः॥ **6.3.9** ॥

हृष्टप्रमुदिता लङ्का मत्तद्विपसमाकुला।
महती रथसम्पूर्णा रक्षोगणनिषेविता॥ **6.3.10** ॥

दृढबद्धकपाटानि महापरिघवन्ति च।
चत्वारि विपुलान्यस्या द्वाराणि सुमहान्ति च॥ **6.3.11** ॥

तत्रेषूपलयन्त्राणि बलवन्ति महान्ति च।
आगतं प्रतिसैन्यं तैस्तत्र प्रतिनिवार्यते॥ **6.3.12** ॥

द्वारेषु संस्कृता भीमाः कालायसमयाः शिताः।
शतशो रचिता वीरैः शतघ्न्यो रक्षसां गणैः॥ **6.3.13** ॥

सौवर्णस्तु महांस्तस्याः प्राकारो दुष्प्रधर्षणः।
मणिविद्रुमवैदूर्यमुक्ताविरचितान्तरः॥ **6.3.14** ॥

सर्वतश्च महाभीमाः शीततोया महाशुभाः।
अगाधा ग्राहवत्यश्च परिखा मीनसेविताः॥ **6.3.15** ॥

द्वारेषु तासां चत्वारः सङ्क्रमाः परमायताः।
यन्त्रैरुपेता बहुभिर्महद्भिर्गृहपङ्क्तिभिः॥ **6.3.16** ॥

त्रायन्ते सङ्क्रमास्तत्र परसैन्यागते सति।
यन्त्रैस्तैरवकीर्यन्ते परिखासु समन्ततः॥ **6.3.17** ॥

एकस्त्वकम्प्यो बलवान् सङ्क्रमः सुमहादृढः।
काञ्चनैर्बहुभिः स्तम्भैर्वेदिकाभिश्च शोभितः॥ **6.3.18** ॥

स्वयं प्रकृतिमापन्नो युयुत्सू राम रावणः।
उत्थितश्चाप्रमत्तश्च बलानामनुदर्शने॥ **6.3.19**॥

लङ्का पुनर्निरालम्बा देवदुर्गा भयावहा।
नादेयं पार्वतं वान्यं कृत्रिमं च चतुर्विधम्॥ **6.3.20**॥

स्थिता पारे समुद्रस्य दूरपारस्य राघव।
नौपथश्चापि नास्त्यत्र निरुद्देशश्च सर्वतः॥ **6.3.21**॥

शैलाग्रे रचिता दुर्गा सा पूर्देवपुरोपमा।
वाजिवारणसम्पूर्णा लङ्का परमदुर्जया॥ **6.3.22**॥

परिखाश्च शतघ्न्यश्च यन्त्राणि विविधानि च।
शोभयन्ति पुरीं लङ्कां रावणस्य दुरात्मनः॥ **6.3.23**॥

अयुतं रक्षसामत्र पूर्वद्वारं समाश्रितम्।
शूलहस्ता दुराधर्षाः सर्वे खड्गाग्रयोधिनः॥ **6.3.24**॥

नियुतं रक्षसामत्र दक्षिणद्वारमाश्रितम्।
चतुरङ्गेण सैन्येन योधास्तत्राप्यनुत्तमाः॥ **6.3.25**॥

प्रयुतं रक्षसामत्र पश्चिमद्वारमाश्रितम्।
चर्मखड्गधराः सर्वे तथा सर्वास्त्रकोविदाः॥ **6.3.26**॥

न्यर्बुदं रक्षसामत्र उत्तरद्वारमाश्रितम्।
रथिनश्चाश्ववाहाश्च कुलपुत्राः सुपूजिताः॥ **6.3.27**॥

शतशोऽथ सहस्राणि मध्यमं स्कन्धमाश्रिताः।
यातुधाना दुराधर्षाः साग्रकोटिश्च रक्षसाम्॥ **6.3.28**॥

ते मया सङ्क्रमा भग्नाः परिखाश्चावपूरिताः।
दग्धा च नगरी लङ्का प्राकाराश्चावसादिताः।
बलैकदेशः क्षपितो राक्षसानां महात्मनाम्॥ **6.3.29**॥

येन केन तु मार्गेण तराम वरुणालयम्।
हतेति नगरी लङ्का वानरैरुपधार्यताम्॥ **6.3.30**॥

अङ्गदो द्विविदो मैन्दो जाम्बवान् पनसो नलः।
नीलः सेनापतिश्चैव बलशेषेण किं तव॥ **6.3.31**॥

प्लवमाना हि गत्वा तां रावणस्य महापुरीम्।
सपर्वतवनां भित्त्वा सखातां च सतोरणाम्।
सप्राकारां सभवनामानयिष्यन्ति राघव॥ **6.3.32**॥

एवमाज्ञापय क्षिप्रं बलानां सर्वसङ्ग्रहम्।
मुहूर्तेन तु युक्तेन प्रस्थानमभिरोचय॥ **6.3.33**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे तृतीयः सर्गः॥